# .. Mahagayatrililastuti ..

# ॥ મહાગાયત્રીલીલાસ્તુતી ॥

## Document Information

Text title : mahAgAyatrilIlAstuti
File name : mahAgAyatrilIlAstuti.itx
Location : doc_devii
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Jagannath Vedula jvedula at yahoo.com
Proofread by : Jagannath Vedula jvedula at yahoo.com
Latest update : September 11, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ મહાગાયત્રીલીલાસ્તુતી ॥

ॐ
અથ મહાગાયત્રીલીલાસ્તુતિઃ ।
સદા ગવેષયન્ જગત્રયેષુ વેદમાતરં
ચિદાત્મના કૃતસ્થિતં સમત્ર ચાદ્ય લબ્ધવાન્ ।
ઉદસ્રુ ગદ્ગદં મહોદયાત્પ્રણૌમિ ભક્તિનૌકયા
સુદુસ્તરં દ્રુતં તિતીર્ષુરાપદર્ણવમ્ ॥ ૧॥

સુહીનલોકપાતિની સતાં કૃપાઽતિશોભતે
હ્યત્સુધાંશુચક્ષુષે ક્ષયામ્બ ! માદ્યશં જનમ્ ।
નવાપિ હીયતે તવેષદીશિ ! પાલનેનનો
ભવાદ્યતઃ કુપુત્રતા ન ભાસતે પ્રસૂહૃદિ ॥ ૨।

નમામિ મુક્તવિદ્રુમપ્રતપ્તહાટકાઽસિતા-
વદાતવર્ણસુન્દરૈઃ ષડર્ધલોલલોચનૈઃ ।
સરોજષણ્ડબાન્ધવપ્રતપ્તપાવકપ્રભૈઃ
કિરીટરત્નરઞ્જિતૈઃ સુધાંશુખણ્ડમણ્ડિતૈઃ ॥ ૩॥

મુખૈર્દશાર્ધસંમિતૈર્વિરાજમાનવિગ્રહાં
સુરેશચાપસપ્રભાં સમસ્તદેવવન્દિતામ્ ।
વરાભયાઙ્કુશાન્વિતૈઃ કપાલશૂલ શંખ-
ચક્રસારસદ્વયીગુણાઙ્કિતૈઃ કરૈર્વિરાજિતામ્ ॥ ૪॥

ભવદ્રુમસ્ય મૂલતાં ગતાં મુનીન્દ્રવન્દિતામ્
અખણ્ડ ભાવમણ્ડલપ્રકાશકારિણીં શિવામ્ ।
સમસ્તદેવતામયીં સમસ્ત સિદ્ધિદયિનીમ્
પૂર્વરૂપ વિગ્રહાં સરસ્વતીં ભવાર્તિહામ્ ॥ ૫॥

શુચીન્દુસૂર્યલોચનાં શુચીન્દુસૂર્ય વિગ્રહામ્
શુચીન્દુસૂર્યસઙ્ગમસ્વભાવશાલિનીં શુભામ્ ।
પદદ્વયાનુકમ્પિતસ્વશક્તિચક્રસેવિતાં
પરેશશક્તિમુત્તમાં ભજે ત્રિલોકસુન્દરીમ્ ॥ ૬॥

મહામહેશ્વરી જગદ્વિસર્ગસુસ્થિતિક્ષય-
સ્વતંત્રતા શરીરિણી બભૂવ યા મહેશિતુઃ ।
દ્વિપત્રિતાદિભેદતો લતાયમાનવિગ્રહા
ત્રયીશ્વરી સદા તુ સા જગડ્જયાય જાયતામ્ ॥ ૭॥

નમામિ તન્મુખારવિન્દપઞ્ચકં મલાપહં
ગલૈકનાલકં સદાવિકાસિ ભક્તિસમ્ભવમ્ ।
સ્વભક્તહંસસેવિતં શુચીન્દુપદ્મબન્ધવઃ
પ્રતીકભૂતવિગ્રહા ગતા હિ યત્ર પઞ્ચતામ્ ॥ ૮॥

ભવાર્ણવેઽતિદુઃસહસ્મરાધિદિગ્ધમાનસં
ષડૂર્મિનિત્યપીડિતં જનં દિધીર્ષુમાનસા ।
શ્રુતિધ્વનિસ્ફુરન્મુખારવિન્દભૂસુરૈઃ સદા
ત્રિસન્ધ્યમીશ્વરી નુતાઽસ્તુ સા સુખપ્રદા હિ નઃ ॥ ૯॥

ત્રયીપ્રસૂઃ સ્વદૃષ્ટિપાતધૂતભક્તકલ્મષા
સમૈર્જ્રનૈર્નુતા મુદા સ્વવર્ણધર્મભેદતઃ ।
નિલિમ્પનિમ્નગામિષેણ પાદધૌતજં જલં
યદીયમાગતં ક્ષિર્તિં તનોતુ નઃ શિવં તુ સા ॥ ૧૦॥

સ્વદમ્ભવઞ્ચિતાખિલં કુભોગસક્તમાનસં
સદાઽશુચિં કુમાર્ગગં શઠં ચ શઙ્કસે યદિ ।
કથં સ્વપાદચિન્તનોત્થવૈભવં નહીશ્વરિ !
યતોઙ્ઘ્રિચિન્તકં દયાદૃશેક્ષસે ન માદૃશમ્ ॥ ૧૧॥

અનેકદોષદૂષિતેષ્વનિર્વિવેચના સતી
સ્વતંત્રશક્તિરીશ્વરી ભવાધનાશકારિણી ।
કૃપામયીમ્ દૃશં વિધાય સા સ્વભક્તિપાત્રિતં
સ્વપત્કજે મધુવ્રતં કરોતુ મામહર્નિશમ્ ॥ ૧૨॥

ત્રિસન્ધ્યમિષ્ટદૈવતં સુકેશવાસ્યજં સ્તવં
સ્મરન્ હૃદીદ્ધભાવનો વિધાય વેદમાતરમ્ ।
વિધૂય પાપસંચયં વિતીર્ય કીર્તિમુત્તમામ્-
ઇહ ત્વમુત્ર કૈવલં પદં સ યાતિ નિર્ભયમ્ ॥ ૧૩॥

ઇતિ શ્રીમહાગાયત્રીલીલાસ્તુતિઃ ।

Encoded and proofread Jagannath Vedula jvedula at yahoo.com

.. Mahagayatrililastuti ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*